मारजन्तुः । इति हेमचन्द्रः ॥ सुसुक इति भाषा ।

अम्बुकूर्म्मः, पुं, (अम्बुनः कूर्म्म इव) । शिशुमारः । इति हेमचन्द्रः ॥

अम्बुकेशरः, पुं, (अम्बुजातः केशरोऽस्य ।) छोलङ्गवृक्षः । इति रत्नमाला ॥

अम्बुचामरं, क्ली, (अम्बुनः चामरमिव ।) शैवालं । इति जटाधरः । शेयाल इति भाषा ।

अम्बुजं, क्ली, (अम्बुनि जायते, अम्बु + जन् + डः ।) पद्मं । इति मेदिनी ॥ "इन्दीवरेण नयनं मुखमम्बुजेन" । इति शृङ्गारतिलके । "अम्बुजमम्बुनि जातं क्वचिदपि न जायतेऽम्बुजादम्बु" । इत्युद्भटः ।) वज्रं । इति त्रिकाण्डशेषः ॥

अम्बुजः, पुं, (अम्बुसमीपे जातः ।) हिज्जलवृक्षः । इत्यमरः ॥ (निचुलवृक्षः ॥
"अम्बुजं कमले क्लीवं हिज्जले तु पुमानयं" ।
इति शब्दरत्नावली ।
"अम्बुजो निचुले पुंसि कमले तु नपुंसकं" ।
इति मेदिनी ।)

अम्बुजन्म, [न्] क्ली, (अम्बुनो जन्मास्य ।) पद्मं । इति राजनिर्घण्टः ॥ (सारसविहङ्गः ॥ शङ्खः । त्रि, जलजातः । सलिलोद्भवः ।)

अम्बुतालः, पुं, (अम्बुनि जले तालयति प्रतिष्ठां गच्छति अम्बु + तल + णिच् + अच् ।) शैवालं । इति त्रिकाण्डशेषः ॥

अम्बुदः, पुं, (अम्बु जलं ददाति, दा दाने + कः ।) मेघः । इति रत्नमाला ॥ ("सदा मनोज्ञाम्बुदनादसोत्सुकम्" । इति ऋतुसंहारे । "शशाक निर्व्वापयितुं न वासवः स्वतश्च्युतं वह्निमिवाद्भिरम्बुदः" । इति रघुवंशे ।) मुस्तकं । यथा । "कणीसविश्वानलदं सहाम्बुदं" । इति वैद्यकं ॥

अम्बुधिः, पुं, (अम्बूनि धीयन्तेऽत्र, अम्बु + धा + कर्म्मण्यधिकरणे किः ।) समुद्रः । इति शब्दरत्नावली ॥ ("रे चाञ्चल्ययुजो मृगाः श्रितनगाः कल्लोलमालाकुलामेतामम्बुधिगामिनीं व्यवसिताः सङ्गाहितुं वा कथम्" । इति भामिनीविलासे ।
"सुरासुराश्च गन्धर्व्वाः क्षोभयामासुरम्बुधिम्" ।
इति रामायणे ।)

अम्बुधिस्रवा, स्त्री, (अम्बुधि + स्रु + अप्, स्त्रियां टाप् ।) स्थूलकन्या । घृतकुमारी इति ख्याता । इति राजनिर्घण्टः ॥

अम्बुपः, पुं, (अम्बूनि जलानि पाति पिबति वा, अम्बु + पा + कः ।) चक्रमर्द्दकवृक्षः । इति शब्दचन्द्रिका ॥ (जलेश्वरः । वरुणः ।) शतभिषाख्य नक्षत्रं । त्रि, जलपानकारी ।)

अम्बुपत्रा, स्त्री, (अम्बूनि पत्रे यस्याः सा ।) उच्चटावृक्षः । इति रत्नमाला ॥

अम्बुप्रसादः, पुं, (अम्बूनि प्रसादयति स्वच्छतां नयति अम्बु + प्र + सद + णिच् + अण्, उपपदसमासः ।) कतकवृक्षः । इति राजनिर्घण्टः ॥ निर्म्मली इति ख्यातः ।

अम्बुप्रसादनं, क्ली, (अम्बूनि प्रसादयति, प्र + सद णिच् + ल्युट् ।) कतकवृक्षः । इति त्रिकाण्डशेषः ॥

अम्बुभृत्, पुं, (अम्बु बिभर्त्ति, अम्बु + भृ + क्विप् ।) मेघः । मुस्तकं । इत्यमरः ॥ समुद्रः । इति केचित् ॥

अम्बुमात्रजः, पुं, (अम्बुमात्रे अल्पजले जायते, जन + डः) शम्बूकः । शामुक इति हेमचन्द्रः ॥ इति भाषा ।

अम्बुरः, पुं, (अम्बु + उरन् ।) द्वाराधःकाष्ठं । इति हेमचन्द्रः ॥ गोवरात् इति भाषा ।

अम्बुरुहा, स्त्री, (अम्बुनि रोहति, अम्बु + रुह + कः, ततष्टाप् ।) स्थलपद्मिनी । इति राजनिर्घण्टः ॥

अम्बुवाची, स्त्री, (अम्बु तद्धर्म्मं वाचयति सूचयति, वच् + णिच् + अण्, उपपदसमासः, ङीप् ।) ऋतुमती पृथ्वी । यथा,—
"यदार्द्रे यत्काले मिथुनसंक्रमणं भूतं तदाराभ्यन्तरे तावत्कालावधि त्रिंशत्यादिदण्डाधिकदिनत्रयमम्बुवाची । तत्राध्ययनं वीजवपनं न कार्य्यं । सर्पभयोपशमनाय दुग्धं पेयं" । इति कृत्यतत्त्वं ॥ * ॥
अपिच । ज्योतिषे ।
"रजोयुक् स्यादम्बुवाची च रौद्राद्यपादगे रवौ ।
तस्यां पाठो वीजवापो नाहिभीर्दुग्धपानतः ॥
मृगशिरसि निवृत्ते रौद्रपादेऽम्बुवाची
ऋतुमति खलु पृथ्वी वर्ज्जयेत् त्रीण्यहानि ।
यदि वपति कृषाणः क्षेत्रमासाद्य वीजं
न भवति फलभागी शस्यचाण्डालपाकः" ॥
रजोयुक् स्यात् ऋतुमती पृथ्वी । मत्स्यसूक्ते ।
"धरण्यामृतुमत्याञ्च भूमिकम्पे तथैव च ।
अन्तरागमने चैव विद्यां नैव पठेद्बुधः" ॥
ज्योतिषे ।
"यस्मिन् वारे सहस्रांशुर्यत्काले मिथुनं व्रजेत् ।
अम्बुवाची भवेन्नित्यं पुनस्तत्कालवारयोः" ॥
इदन्तु प्रायिकं । इति तिथ्यादितत्त्वं ॥ * ॥ अन्यच्च ।
"यदार्द्धं समादाय भानोर्म्मिथुनगामिता ।
पुनस्तत्तुल्यमादाय यजनं त्रिदिनं त्यजेत् ॥
काम्यनैमित्तिकञ्चैव यात्रां मन्त्रक्रियान्तथा ।
ऋतुमत्यां न कुर्व्वीत पूर्व्वसङ्कल्पितादृते ॥
न कुर्य्यात् खननं भूमेः सूच्यग्रेणापि शङ्करि ।
वीजानां वपनञ्चैव चतुर्व्विंशतियामकं ॥
प्रमादाद्वपनं कृत्वा यावत्तत्र प्रचारयेत् ।
कृच्छ्रं कुर्य्यात् ततस्तस्याश्च खननात्तिलकाञ्चनं" ॥
इति मत्स्यसूक्ते महातन्त्रे ५८ पटलः ॥ * ॥ अपरञ्च ।
"रवौ रुद्राद्यपादस्थे भूमेः संजायते रजः ।
तस्मात्दिनत्रयं यावत् वीजवापं परित्यजेत् ॥
चत्वारिंशच्छिच्छिकषड्भागयुतो रविर्यदा भवति ।
तत्राम्बुवाची ज्ञेया शिवर्क्षपादस्थितो यावत् ॥
दिग्भागशून्यलिप्तो गणितेन भवति रविर्यदा साम्नः ।
स भवति निर्गुणकालो द्वितीयपादाश्रयाद्रौद्रे" ॥
"न स्वाध्यायं वषट्कारं न देवपितृतर्पणं ।
हलानां वाहनञ्चैव वीजानां वपनं तथा" ॥
इति राजमार्त्तण्डः ॥ * ॥ अथ पाकनिषेधो यथा,—
"यतिनो व्रतिनश्चैव विधवा च द्विजस्तथा ।
अम्बुवाचीदिने चैव पाकं कृत्वा न भक्षयेत् ॥
स्वपाकं परपाकं वा अम्बुवाचीदिने तथा ।
भक्षणं नैव कर्त्तव्यं चाण्डालान्नसमं स्मृतं" ॥
इति संवत्सरप्रदीपे विष्णुरहस्यं ॥

अम्बुवासिनी, स्त्री, (अम्बुप्रधाने देशे वसति, वस् + णिनि ङीप् ।) पाटलावृक्षः । इति जटाधरः ॥

अम्बुवासी, स्त्री, (अम्बुप्रधाने देशे वासो यस्याः सा, गौरादित्वात्, ङीष् ।) पाटलावृक्षः । इति राजनिर्घण्टः ॥

अम्बुवाहः, पुं, (अम्बूनि वहति, अम्बु + वह् + अण्, उपपदसमासः ।) मेघः । इति रत्नमाला ॥ ("विश्वासितं शरणसमार्पितजीवितोऽयं नाकर्णितः किमु सखे भवताम्बुवाहः" ॥ इति भामिनीविलासे । "विभ्राजमानोसरुचं पिशङ्गीर्जटास्तडिल्वन्तमिवाम्बुवाहं" । इति भारविः ।) मुस्तकं । मेघनामा इत्यमरेणोक्तत्वात् ॥

अम्बुवाहिनी, स्त्री, (अम्बूनि वहति स्थानान्तरं नयति, अम्बु + वह + णिनि, उपपदसमासः, ङीप् ।) काष्ठाम्बुवाहिनी । काष्ठादिकृतच्छिन्नायनौकाद्यतिजलसेचनी । इत्यमरटीकायां मथुरानाथः ॥

अम्बुवेतसः, पुं, (अम्बुजातो वेतसः, कर्म्मधारयः, मध्यपदलोपश्च ।) जलवेतसः । तत्पर्य्यायः । परिव्याधः २ विदुलः ३ नादेयी ४ । इत्यमरः ॥

अम्बुशिरीषिका, स्त्री, (अम्बुनि अल्पः शिरीषः, अल्पार्थे कन् स्त्रीत्वम् ।) जलशिरीषवृक्षः । तत्पर्य्यायः । शिरीषिका २ टिण्टिणिका ३ दुर्व्वला ४ वारिशिरीषिका ५ । अस्या गुणाः । त्रिदोषविषकुष्ठार्शोनाशित्वं । इति भावप्रकाशः ॥

अम्बुसर्पिणी, स्त्री, (अम्बुनि सर्पति अम्बु + सृप + णिनि, उपपदसमासः ।) जलौकाः । इति त्रिकाण्डशेषः ॥ जोँक इति भाषा ।

अम्बुसेचनी, स्त्री, (अम्बूनि सिच्यन्ते अनया, अम्बु + सिच् + करणे ल्युट्, ङीप् ।) अम्बुवाहिनी । नौकाजलसेचनपात्रं । इत्यमरटीकायां मथुरानाथः ॥

अम्बूकृतं, त्रि, (अनम्बु अम्बु सम्पद्यमानं कृतं, अम्बु + कृ + क्त, अभूततद्भावे च्विः ।) श्लेष्मकणनिर्गमसहितवाक्यं । तत्पर्य्यायः । सनिष्ठीवं २ । इत्यमरः ॥ सथूत्कारं ३ । इति हेमचन्द्रः ॥ (सनिष्ठीवमुखरावः । "दधति कुहरभाजामत्र भल्लूकयूनामनुरसितगुरूणि स्त्यानमम्बूकृतानि" । इति उत्तरचरिते ।)

अम्ब्बः, पुं, (अबि शब्दे क्तः ।) अम्लरसः । इत्युणादिकोषः ॥ अम्बल । टक इति च भाषा ।

अम्भः, [स्] क्ली, (आप्यते, आप् + असुन् ।) जलं । वालनामौषधं । इत्यमरः ॥ लग्नादितश्चतुर्थराशिः । इति ज्योतिषं ॥ (अङ्कशास्त्रे चतुर्थसंख्या । वैदिकच्छन्दोभेदः ।)

अम्भःसारं, क्ली, (अम्भसां सारं ।) मुक्ता । इति राजनिर्घण्टः ॥ अम्भस्सारमपि पाठः ॥

अम्भःसूः, पुं, (अम्भांसि सूते, सू + क्विप् ।) धूमः । इति हेमचन्द्रः ॥ अम्भस्सूरिति च पाठः ॥